# संस्कृत-वार्ता:

दिनाङ्क : 22.12.2025 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- भारत-न्यूजीलैण्ड्-देशौ मुक्तव्यापार-सन्धिं घोषितवन्तौ प्रधानमन्त्रिणा उक्तं यत् पञ्चवर्षेषु द्वैपाक्षिकव्यापारं द्विगुणीकर्तुं सन्धिः मञ्चं स्थापयिष्यति।
- वाणिज्य-उद्योग-मन्त्रिणा पियूष गोयलेन भणितं यत् अयं व्यवहारः कृषकाणां, उद्यमशीलानां, छात्राणां, महिलानां, नवप्रवर्तकानां च कृते अवसरान् आनेश्यति।
- प्रशासनेन स्पष्टीकृतं यत् अरावली-क्षेत्रे नगरीकरणस्य सर्वकारस्य कापि योजना नास्ति, तस्य एकमात्र लक्ष्यं अस्याः श्रेण्याः संरक्षणे अस्ति।
- बाङ्ग्ला-देशस्य अल्पसङ्ख्यक-सङ्घटनानां नेतारः आरोपितवन्तः अन्तरीम-सर्वकारः अल्पसङ्ख्यकान् लक्ष्यीकृत्य हिंसा, हत्याः, उत्पीडनं च निवारयितुं असफलः अभवत् ।
- भारतं, विश्व-स्वास्थ्य-सङ्घटनम्, च वैश्विक-स्वास्थ्य-मानकेषु पारम्परिक-चिकित्सायाः एकीकरणार्थं प्रमुखं पदाक्षेपं स्वीकृतवन्तौ। नवदिल्ल्यां द्विदिवसीय-तान्त्रिक-परियोजना-सभायाः आयोजनं कृतवन्तौ।

<u>-------------------------------------------</u>

<u>भारत-न्यूजीलैण्ड – मुक्तव्यापारसमन्वय:</u>

भारत-न्यूजीलैण्ड-देशौ ऐतिहासिकं, परस्पर-लाभप्रदं च मुक्तव्यापारसमन्वयं सफलतया सम्पन्नं कृतवन्तौ। अद्य प्रधानमन्त्रिणा नरेन्द्रमोदिना न्यूजीलैण्ड-देशस्य प्रधानमन्त्रिणा क्रिस्टोफर लक्सन इत्यनेन च सह एतत् घोषितम्। श्रीमोदी अद्य श्रीलक्सन इत्यनेन सह दूरभाषया वार्तालापम् कृतवान्। अस्मिन् वर्षे मार्च-मासे श्री-लक्सन इत्यस्य भारतयात्रायाः समये वार्तालापस्य आरम्भः अभवत्। प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत्, भारत-न्यूजीलैण्ड-देशयोः मध्ये एफ. टि. ए. इत्यनेन आगामिषु पञ्चवर्षेषु द्वैपाक्षिकव्यापारं द्विगुणीकर्तुं मञ्चः निर्मितः अस्तीति। सामाजिकान्तर्जालीये सन्देशे श्रीमोदी अवदत् यत्, भारत-न्यूजीलैण्ड-देशयोः

सहभागित्वमं नूतनम् औन्नत्यं प्राप्नुयादिति। सः अवदत् यत्, भारतं न्यूज़ीलैण्ड-देशात् विविधक्षेत्रेषु प्रायः द्विसहस्र कोटिरुप्यकाणां निवेशानां स्वागतं करोति। सामाजिकान्तर्जालीये सन्देशे श्रीलक्सनेन निर्णयस्य प्रशंसां कृता, भारताय प्रत्यक्ष-निर्यातस्य शुल्कं पञ्चनवति प्रतिशतं यावत् न्यूनीकर्तुं भारत-न्यूजीलैण्ड-देशयोः मध्ये ऐतिहासिक-व्यापार-व्यवहारः इति सः वर्णितवान्।

अद्य नवदिल्ल्यां वार्ताहरान् सम्बोधयन् केन्द्रीय-वाणिज्य-उद्योग-मन्त्री पियूष-गोयलः अवदत् यत् एफ़. टि. ए. इत्यनेन कृषकाणां, उद्यमशीलानां, छात्राणां, महिलानां, नवप्रवर्तकानां च कृते व्यापारस्य निर्माणं कृत्वा विविधाः अवसराः निर्मिताः भविष्यन्ति। श्री गोयलः दृढतया उक्तवान् यत् एफ़. टि. ए. इतीदं विश्वस्य भूराजनीतेः विषये भारतस्य वर्धमानं सामरिकं महत्त्वं प्रतिबिम्बयति। एफ़. टि. ए. द्वारा प्रदत्तेन दृढविश्वासस्य आधारेण, उभौ प्रधानौ अग्रिमेषु पञ्चवर्षेषु द्वैपाक्षिकव्यापारं द्विगुणीकर्तुं तथा अग्रिमेषु पञ्चदश वर्षेषु न्यूज़ीलैण्ड-देशात् भारते द्विसहस्र कोटिरुप्यकाणां-निवेशानां विश्वासं प्रकटितवन्तौ।

---------------------------------------------

## भूपेन्द्र यादव – अरावली क्षेत्र

पर्यावरण-वन-ऋतुदशा-परिवर्तन-मन्त्री भूपेन्द्र-यादवः स्पष्टीकृतवान् यत् अरावली-क्षेत्रे नगरीकरणस्य सर्वकारस्य कापि योजनां नास्ति, तस्य एकमात्रं ध्यानं लक्ष्यं च अस्याः श्रेण्याः संरक्षणे अस्ति। नवदिल्ल्यां वार्ताहरान् सम्बोधयन्, श्रीयादवः अवदत् यत् फुलेरा, अजमेर, उदयपुर, बून्दी इत्यादीनि अनेकानि नगराणि पूर्वमेव अरावली-प्रदेशे स्थितानि सन्ति, यत्र जनाः बहुकालेभ्यः निवसन्तः सन्ति। सः अवदत् यत् सर्वोच्चन्यायालयेन अरावल्याः संरक्षितक्षेत्राणि परिभाषितानि सन्ति। श्रीयादवः अवदत् यत् परिभाषायाः आधारेण राज्यानि कठोरनियमानां निर्माणं कर्तुं शक्नुवन्ति। मन्त्रिणा उक्तं यत्, प्रायः नवति प्रतिशत-क्षेत्रेषु खननकार्याणि न सम्भवन्ति।

---------------------------------------------

## राष्ट्रपतिः - शान्ति

राष्ट्रपतिः द्रौपदी मुर्मुः भारतं परिवर्तनाय परमाणु-ऊर्जायाः सुस्थिर-उपयोगः तथा उन्नतिः शान्तीति विधेयकं स्वीकृतवती, यत् संसदा शीतकालसत्रावधौ स्वीकृतम्। विधेयकं नागरिक-परमाणु-क्षेत्रसम्बद्धान् सर्वाणि विधयः समाविशति, अपि च निज-सहभागितायाः कृतेऽपि उद्घाटयति।

---

## राजधानी - सघन- निहार:

अद्य राष्ट्रियराजधान्यां दिल्ल्यां एनसीआर-क्षेत्रे च सघन-निहार-कारणात् अनेकेषु विमानयानेषु रेलयानेषु च व्यवधानं अभवत्। आकाशवाण्या: सह वार्तालापं कुर्वन् दिल्ली-विमानस्थानकस्य एकः अधिकारी अवदत् यत् इन्दिरागान्धी अन्तर्राष्ट्रीयविमानस्थानके न्यूनदृश्यतायाः कारणात् प्रायः दश-विमानयानानि निरस्तिकृतानि। भारतीयरेलविभागस्य दिल्ल्या: क्षेत्रीय-विभागेन प्रोक्तं यत् अद्यैव दिल्लीं प्रति गम्यमानानां अनेकानां रेलयानानां गतिः अपि बाधिता। तत्र प्रोक्तं यत् प्रायः सप्तदश रेलयानानि त्रिहोरा यावत् विलम्बानि जातानि । ऋतु-विज्ञान-विभागेन अद्य प्रात:-रात्रौ च अल्प-निहारस्य स्थिते: संभावना प्रकटिता।

---

## राष्ट्रिय-महिला-आयोग:

राष्ट्रिय-महिला-आयोगेन, एन. सी. डब्ल्यू. इत्यनेन शक्ति-स्कालर्स-एन. सी. डब्ल्यू. इत्यस्य युव-शोध-शिक्षावृत्ति-कार्यक्रमस्य आरम्भः कृतः, आयोगः भारते महिला-प्रभावितानां विषयेषु नीति-अभिमुखी-अनुसंधानं कर्तुं युवछात्रेभ्यः शोधकर्तृभ्यः च आवेदनपत्राणि आमन्त्रयति। एकविंशति तः त्रिंशत् वर्षाणां नागरिकाणां कृते अध्येतावृत्तिः उद्घाटितास्ति, ये मान्यताप्राप्तसंस्थया न्यूनाति-न्यूनं स्नातकपदवीं धारयन्ति। एन. सी. डब्ल्यू. इत्यनेन उक्तं यत्, षण्मासस्य शोधाय चयनितानां अभ्यर्थिनां कृते एकलक्षरूप्यकाणां शोध-अनुदानस्य व्यवस्थाऽस्ति। छात्राः अस्य मासस्य एकत्रिंशत् दिनाङ्कपर्यन्तं आवेदनपत्राणि प्रेषयितुं शक्नुवन्ति।

---

## बाङ्ग्लादेश- अल्पसङ्ख्यकः

बाङ्ग्लादेश-देशस्य अल्पसङ्ख्यक-सङ्घटनानां नेतारः मोहम्मद् यूनुस् इत्यस्य नेतृत्वे अन्तरीम-सर्वकारः धार्मिक-जातीय-अल्पसङ्ख्यकान् लक्ष्यीकृत्य हिंसा, हत्याः, उत्पीडनं च निवारयितुं असफलः अभवत् इति आरोपितवन्तः। अद्य ढाका-नगरे अल्पसङ्ख्यक-एकता-मोर्चा इत्यनेन आयोजिते मानवशृङ्खलायाः समये आरोपः कृतः। प्रवक्तारः उक्तवन्तः यत् अपर्याप्त-अन्वेषणस्य, न्यायस्य च अभावेन आगामि राष्ट्रियनिर्वाचनात् पूर्वं, विशेषतः अल्पसङ्ख्यक-समुदायेषु व्यापकं भयम् अस्ति। श्रमिक-सुरक्षा-मञ्चः श्रम-मानव-अधिकार-समूहाः अपि दीपुचन्द्रदासस्य हत्यायाः त्वरित-विचारणार्थं मानवशृङ्खला निर्मितवन्तः।

---

## विश्व-स्वास्थ्य-सङ्घटनम्

भारतं, विश्व-स्वास्थ्य-सङ्घटनम्, डब्ल्यू. एच्. ओ. च वैश्विक-स्वास्थ्य-मानकेषु पारम्परिक-चिकित्सायाः एकीकरणार्थं प्रमुखं पदाक्षेपं स्वीकृतवन्तौ। अस्मिन् विषये आयुष्-मन्त्रालयः तथा डब्ल्यू. एच्. ओ. इत्युभौ नवदिल्ल्यां द्विदिवसीय-तान्त्रिक-परियोजना-सभायाः आयोजनं कृतवन्तौ।

॥ इति वार्ताः ॥